# AparokShanubhuti by Shankaracharya

# અપરોક્ષાનુભૂતિઃ

## Document Information

Text title : aparokShAnubhUti

File name : aparokshaanubhuuti.itx

Category : vedanta, shankarAchArya

Location : doc_z_misc_shankara

Author : Adi Shankaracharya

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi, David Lyttle, PSA Easwaran, kalyana krrit

Latest update : January 2, 1998, January 12, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 12, 2022

*sanskritdocuments.org*

# અપરોક્ષાનુભૂતિઃ

શ્રીહરિં પરમાનન્દમુપદેષ્ટારમીશ્વરમ્ ।
વ્યાપકં સર્વલોકાનાં કારણં તં નમામ્યહમ્ ॥ ૧॥

અપરોક્ષાનુભૂતિર્વૈ પ્રોચ્યતે મોક્ષસિદ્ધયે ।
સદ્ભિરેષા પ્રયત્નેન વીક્ષણીયા મુહુર્મુહુઃ ॥ ૨॥

સ્વવર્ણાશ્રમધર્મેણ તપસા હરિતોષણાત્ ।
સાધનં પ્રભવેત્પુંસાં વૈરાગ્યાદિ ચતુષ્ટયમ્ ॥ ૩॥

બ્રહ્માદિસ્થાવરાન્તેષુ વૈરાગ્યં વિષયેષ્વનુ ।
યથૈવ કાકવિષ્ઠાયાં વૈરાગ્યં તદ્ધિ નિર્મલમ્ ॥ ૪॥

નિત્યમાત્મસ્વરૂપં હિ દૃશ્યં તદ્વિપરીતગમ્ ।
એવં યો નિશ્ચયઃ સમ્યગ્વિવેકો વસ્તુનઃ સ વૈ ॥ ૫॥

સદૈવ વાસનાત્યાગઃ શમોઽયમિતિ શબ્દિતઃ ।
નિગ્રહો બાહ્યવૃત્તીનાં દમ ઇત્યભિધીયતે ॥ ૬॥

વિષયેભ્યઃ પરાવૃત્તિઃ પરમોપરતિર્હિ સા ।
સહનં સર્વદુઃખાનાં તિતિક્ષા સા શુભા મતા ॥ ૭॥

નિગમાચાર્યવાક્યેષુ ભક્તિઃ શ્રદ્ધેતિ વિશ્રુતા ।
ચિત્તૈકાગ્ર્યં તુ સલ્લક્ષ્યે સમાધાનમિતિ સ્મૃતમ્ ॥ ૮॥

સંસારબન્ધનિર્મુક્તિઃ કથં સ્યાન્મે દયાનિધે ।
ઇતિ યા સુદૃઢા બુદ્ધિર્વક્તવ્યા સા મુમુક્ષુતા ॥ ૯॥

ઉક્તસાધનયુક્તેન વિચારઃ પુરુષેણ હિ ।
કર્તવ્યો જ્ઞાનસિદ્ધ્યર્થમાત્મનઃ શુભમિચ્છતા ॥ ૧૦॥

નોત્પદ્યતે વિના જ્ઞાનં વિચારેણાન્યસાધનૈઃ ।
યથા પદાર્થભાનં હિ પ્રકાશેન વિના ક્વચિત્ ॥ ૧૧॥

કોઽહં કથમિદં જાતં કો વૈ કર્તાઽસ્ય વિદ્યતે ।
ઉપાદાનં કિમસ્તીહ વિચારઃ સોઽયમીદૃશઃ ॥ ૧૨॥

નાહં ભૂતગણો દેહો નાહં ચાક્ષગણસ્તથા ।
એતદ્વિલક્ષણઃ કશ્ચિદ્વિચારઃ સોઽયમીદૃશઃ ॥ ૧૩॥

અજ્ઞાનપ્રભવં સર્વં જ્ઞાનેન પ્રવિલીયતે ।
સઙ્કલ્પો વિવિધઃ કર્તા વિચારઃ સોઽયમીદૃશઃ ॥ ૧૪॥

એતયોર્યદુપાદાનમેકં સૂક્ષ્મં સદવ્યયમ્ ।
યથૈવ મૃદ્ઘટાદીનાં વિચારઃ સોઽયમીદૃશઃ ॥ ૧૫॥

અહમેકોઽપિ સૂક્ષ્મશ્ચ જ્ઞાતા સાક્ષી સદવ્યયઃ ।
તદહં નાત્ર સન્દેહો વિચારઃ સોઽયમીદૃશઃ ॥ ૧૬॥

આત્મા વિનિષ્કલો હ્યેકો દેહો બહુભિરાવૃતઃ ।
તયોરૈક્યં પ્રપશ્યન્તિ કિમજ્ઞાનમતઃ પરમ્ ॥ ૧૭॥

આત્મા નિયામકશ્ચાન્તર્દેહો બાહ્યો નિયમ્યકઃ ।
તયોરૈક્યં પ્રપશ્યન્તિ કિમજ્ઞાનમતઃ પરમ્ ॥ ૧૮॥

આત્મા જ્ઞાનમયઃ પુણ્યો દેહો માંસમયોઽશુચિઃ ।
તયોરૈક્યં પ્રપશ્યન્તિ કિમજ્ઞાનમતઃ પરમ્ ॥ ૧૯॥

આત્મા પ્રકાશકઃ સ્વચ્છો દેહસ્તામસ ઉચ્યતે ।
તયોરૈક્યં પ્રપશ્યન્તિ કિમજ્ઞાનમતઃ પરમ્ ॥ ૨૦॥

આત્મા નિત્યો હિ સદ્રૂપો દેહોઽનિત્યો હ્યસન્મયઃ ।
તયોરૈક્યં પ્રપશ્યન્તિ કિમજ્ઞાનમતઃ પરમ્ ॥ ૨૧॥

આત્મનસ્તત્પ્રકાશત્વં યત્પદાર્થાવભાસનમ્ ।
નાગ્ન્યાદિદીપ્તિવદ્દીપ્તિર્ભવત્યાન્ધ્યં યતો નિશિ ॥ ૨૨॥

દેહોઽહમિત્યયં મૂઢો મત્વા તિષ્ઠત્યહો જનઃ ।
મમાયમિત્યપિ જ્ઞાત્વા ઘટદ્રષ્ટેવ સર્વદા ॥ ૨૩॥

બ્રહ્મૈવાહં સમઃ શાન્તઃ સચ્ચિદાનન્દલક્ષણઃ ।
નાહં દેહો હ્યસદ્રૂપો જ્ઞાનમિત્યુચ્યતે બુધૈઃ ॥ ૨૪॥

નિર્વિકારો નિરાકારો નિરવદ્યોઽહમવ્યયઃ ।
નાહં દેહો હ્યસદ્રૂપો જ્ઞાનમિત્યુચ્યતે બુધૈઃ ॥ ૨૫॥

નિરામયો નિરાભાસો નિર્વિકલ્પોઽહમાતતઃ ।
નાહં દેહો હ્યસદ્રૂપો જ્ઞાનમિત્યુચ્યતે બુધૈઃ ॥ ૨૬॥

નિર્ગુણો નિષ્ક્રિયો નિત્યો નિત્યમુક્તોઽહમચ્યુતઃ ।
નાહં દેહો હ્યસદ્રૂપો જ્ઞાનમિત્યુચ્યતે બુધૈઃ ॥ ૨૭॥

નિર્મલો નિશ્ચલોઽનન્તઃ શુદ્ધોઽહમજરોઽમરઃ ।
નાહં દેહો હ્યસદ્રૂપો જ્ઞાનમિત્યુચ્યતે બુધૈઃ ॥ ૨૮॥

સ્વદેહં શોભનં ત્યક્ત્વા પુરુષાખ્યં ચ સંમતમ્ ।
કિં મૂર્ખ શૂન્યમાત્માનં દેહાતીતં કરોષિ ભોઃ ॥ ૨૯॥

સ્વાત્માનં શ‍ૃણુ મૂર્ખ ત્વં શ્રુત્યા યુક્ત્યા ચ પૂરુષમ્ ।
દેહાતીતં સદાકારં સુદુર્દર્શં ભવાદૃશામ્ ॥ ૩૦॥

અહંશબ્દેન વિખ્યાત એક એવ સ્થિતઃ પરઃ ।
સ્થૂલસ્ત્વનેકતાં પ્રાપ્તઃ કથં સ્યાદ્દેહકઃ પુમાન્ ॥ ૩૧॥

અહં દ્રષ્ટૃતયા સિદ્ધો દેહો દૃશ્યતયા સ્થિતઃ ।
મમાયમિતિ નિર્દેશાત્કથં સ્યાદ્દેહકઃ પુમાન્ ॥ ૩૨॥

અહં વિકારહીનસ્તુ દેહો નિત્યં વિકારવાન્ ।
ઇતિ પ્રતીયતે સાક્ષાત્કથં સ્યાદ્દેહકઃ પુમાન્ ॥ ૩૩॥

યસ્માત્પરમિતિ શ્રુત્યા તયા પુરુષલક્ષણમ્ ।
વિનિર્ણીતં વિશુદ્ધેન કથં સ્યાદ્દેહકઃ પુમાન્ ॥ ૩૪॥

સર્વં પુરુષ એવેતિ સૂક્તે પુરુષસંજ્ઞિતે ।
અપ્યુચ્યતે યતઃ શ્રુત્યા કથં સ્યાદ્દેહકઃ પુમાન્ ॥ ૩૫॥

અસઙ્ગઃ પુરુષઃ પ્રોક્તો બૃહદારણ્યકેઽપિ ચ ।
અનન્તમલસંસૃષ્ટઃ કથં સ્યાદ્દેહકઃ પુમાન્ ॥ ૩૬॥

તત્રૈવ ચ સમાખ્યાતઃ સ્વયંજ્યોતિર્હિ પૂરુષઃ ।
જડઃ પરપ્રકાશ્યોઽયં કથં સ્યાદ્દેહકઃ પુમાન્ ॥ ૩૭॥

પ્રોક્તોઽપિ કર્મકાણ્ડેન હ્યાત્મા દેહાદ્વિલક્ષણઃ ।
નિત્યશ્ચ તત્ફલં ભુઙ્ક્તે દેહપાતાદનન્તરમ્ ॥ ૩૮॥

લિઙ્ગં ચાનેકસંયુક્તં ચલં દૃશ્યં વિકારિ ચ ।

અવ્યાપકમસદ્રૂપં તત્કથં સ્યાત્પુમાનયમ્ ॥ ૩૯॥

એવં દેહદ્વયાદન્ય આત્મા પુરુષ ઈશ્વરઃ ।
સર્વાત્મા સર્વરૂપશ્ચ સર્વાતીતોઽહમવ્યયઃ ॥ ૪૦॥

ઇત્યાત્મદેહભાનેન પ્રપઞ્ચસ્યૈવ સત્યતા ।
યથોક્તા તર્કશાસ્ત્રેણ તતઃ કિં પુરુષાર્થતા ॥ ૪૧॥

ઇત્યાત્મદેહભેદેન દેહાત્મત્વં નિવારિતમ્ ।
ઇદાનીં દેહભેદસ્ય હ્યસત્ત્વં સ્ફુટમુચ્યતે ॥ ૪૨॥

ચૈતન્યસ્યૈકરૂપત્વાદ્ભેદો યુક્તો ન કર્હિચિત્ ।
જીવત્વં ચ મૃષા જ્ઞેયં રજ્જ્વાં સર્પગ્રહો યથા ॥ ૪૩॥

રજ્જ્વજ્ઞાનાત્ક્ષણેનૈવ યદ્વદ્રજ્જુર્હિ સર્પિણી ।
ભાતિ તદ્વચ્ચિતિઃ સાક્ષાદ્વિશ્વાકારેણ કેવલા ॥ ૪૪॥

ઉપાદાનં પ્રપઞ્ચસ્ય બ્રહ્મણોઽન્યન્ન વિદ્યતે ।
તસ્માત્સર્વપ્રપઞ્ચોઽયં બ્રહ્મૈવાસ્તિ ન ચેતરત્ ॥ ૪૫॥

વ્યાપ્યવ્યાપકતા મિથ્યા સર્વમાત્મેતિ શાસનાત્ ।
ઇતિ જ્ઞાતે પરે તત્ત્વે ભેદસ્યાવસરઃ કુતઃ ॥ ૪૬॥

શ્રુત્યા નિવારિતં નૂનં નાનાત્વં સ્વમુખેન હિ ।
કથં ભાસો ભવેદન્યઃ સ્થિતે ચાદ્વયકારણે ॥ ૪૭॥

દોષોઽપિ વિહિતઃ શ્રુત્યા મૃત્યોર્મૃત્યું સ ગચ્છતિ ।
ઇહ પશ્યતિ નાનાત્વં માયયા વઞ્ચિતો નરઃ ॥ ૪૮॥

બ્રહ્મણઃ સર્વભૂતાનિ જાયન્તે પરમાત્મનઃ ।
તસ્માદેતાનિ બ્રહ્મૈવ ભવન્તીત્યવધારયેત્ ॥ ૪૯॥

બ્રહ્મૈવ સર્વનામાનિ રૂપાણિ વિવિધાનિ ચ ।
કર્માણ્યપિ સમગ્રાણિ બિભર્તીતિ શ્રુતિર્જગૌ ॥ ૫૦॥

સુવર્ણાજ્જાયમાનસ્ય સુવર્ણત્વં ચ શાશ્વતમ્ ।
બ્રહ્મણો જાયમાનસ્ય બ્રહ્મત્વં ચ તથા ભવેત્ ॥ ૫૧॥

સ્વલ્પમપ્યન્તરં કૃત્વા જીવાત્મપરમાત્મનોઃ ।
યોઽવતિષ્ઠતિ મૂઢાત્મા ભયં તસ્યાભિભાષિતમ્ ॥ ૫૨॥

યત્રાજ્ઞાનાદ્ભવેદ્વૈતમિતરસ્તત્ર પશ્યતિ ।
આત્મત્વેન યદા સર્વં નેતરસ્તત્ર ચાણ્વપિ ॥ ૫૩॥

યસ્મિન્સર્વાણિ ભૂતાનિ હ્યાત્મત્વેન વિજાનતઃ ।
ન વૈ તસ્ય ભવેન્મોહો ન ચ શોકોઽદ્વિતીયતઃ ॥ ૫૪॥

અયમાત્મા હિ બ્રહ્મૈવ સર્વાત્મકતયા સ્થિતઃ ।
ઇતિ નિર્ધારિતં શ્રુત્યા બૃહદારણ્યસંસ્થયા ॥ ૫૫॥

અનુભૂતોઽપ્યયં લોકો વ્યવહારક્ષમોઽપિ સન્ ।
અસદ્રૂપો યથા સ્વપ્ન ઉત્તરક્ષણબાધતઃ ॥ ૫૬॥

સ્વપ્નો જાગરણેઽલીકઃ સ્વપ્નેઽપિ જાગરો ન હિ ।
દ્વયમેવ લયે નાસ્તિ લયોઽપિ હ્યુભયોર્ન ચ ॥ ૫૭॥

ત્રયમેવં ભવેન્મિથ્યા ગુણત્રયવિનિર્મિતમ્ ।
અસ્ય દ્રષ્ટા ગુણાતીતો નિત્યો હ્યેકશ્ચિદાત્મકઃ ॥ ૫૮॥

યદ્વન્મૃદિ ઘટભ્રાન્તિં શુક્તૌ વા રજતસ્થિતિમ્ ।
તદ્વદ્બ્રહ્મણિ જીવત્વં ભ્રાન્ત્યા પશ્યતિ ન સ્વતઃ ॥ ૫૯॥

યથા મૃદિ ઘટો નામ કનકે કુણ્ડલાભિધા ।
શુક્તૌ હિ રજતખ્યાતિર્જીવશબ્દસ્તથા પરે ॥ ૬૦॥

યથૈવ વ્યોમ્નિ નીલત્વં યથા નીરં મરુસ્થલે ।
પુરુષત્વં યથા સ્થાણૌ તદ્વદ્વિશ્વં ચિદાત્મનિ ॥ ૬૧॥

યથૈવ શૂન્યે વેતાલો ગન્ધર્વાણાં પુરં યથા ।
યથાકાશે દ્વિચન્દ્રત્વં તદ્વત્સત્યે જગત્સ્થિતિઃ ॥ ૬૨॥

યથા તરઙ્ગકલ્લોલૈર્જલમેવ સ્ફુરત્યલમ્ ।
પાત્રરૂપેણ તામ્રં હિ બ્રહ્માણ્ડૌઘૈસ્તથાઽઽત્મતા ॥ ૬૩॥

ઘટનામ્ના યથા પૃથ્વી પટનામ્ના હિ તન્તવઃ ।
જગન્નામ્ના ચિદાભાતિ જ્ઞેયં તત્તદભાવતઃ ॥ ૬૪॥

સર્વોઽપિ વ્યવહારસ્તુ બ્રહ્મણા ક્રિયતે જનૈઃ ।
અજ્ઞાનાન્ન વિજાનન્તિ મૃદેવ હિ ઘટાદિકમ્ ॥ ૬૫॥

કાર્યકારણતા નિત્યમાસ્તે ઘટમૃદોર્યથા ।
તથૈવ શ્રુતિયુક્તિભ્યાં પ્રપઞ્ચબ્રહ્મણોરિહ ॥ ૬૬॥

ગૃહ્યમાણે ઘટે યદ્વન્મૃત્તિકાઽઽભાતિ વૈ બલાત્ ।
વીક્ષ્યમાણે પ્રપઞ્ચેઽપિ બ્રહ્મૈવાભાતિ ભાસુરમ્ ॥ ૬૭॥

સદૈવાત્મા વિશુદ્ધોઽપિ હ્યશુદ્ધો ભાતિ વૈ સદા ।
યથૈવ દ્વિવિધા રજ્જુર્જ્ઞાનિનોઽજ્ઞાનિનો નિશિ ॥ ૬૮॥

યથૈવ મૃણ્મયઃ કુંભસ્તદ્વદ્દેહોઽપિ ચિન્મયઃ ।
આત્માનાત્મવિભાગોઽયં મુધૈવ ક્રિયતે બુધૈઃ ॥ ૬૯॥

સર્પત્વેન યથા રજ્જૂ રજતત્વેન શુક્તિકા ।
વિનિર્ણીતા વિમૂઢેન દેહત્વેન તથાઽઽત્મતા ॥ ૭૦॥

ઘટત્વેન યથા પૃથ્વી પટત્વેનૈવ તન્તવઃ ।
વિનિર્ણીતા વિમૂઢેન દેહત્વેન તથાઽઽત્મતા ॥ ૭૧॥

કનકં કુણ્ડલત્વેન તરઙ્ગત્વેન વૈ જલમ્ ।
વિનિર્ણીતા વિમૂઢેન દેહત્વેન તથાઽઽત્મતા ॥ ૭૨॥

પુરુષત્વેન વૈ સ્થાણુર્જલત્વેન મરીચિકા ।
વિનિર્ણીતા વિમૂઢેન દેહત્વેન તથાઽઽત્મતા ॥ ૭૩॥

ગૃહત્વેનૈવ કાષ્ઠાનિ ખડ્ગત્વેનૈવ લોહતા ।
વિનિર્ણીતા વિમૂઢેન દેહત્વેન તથાઽઽત્મતા ॥ ૭૪॥

યથા વૃક્ષવિપર્યાસો જલાદ્ભવતિ કસ્યચિત્ ।
તદ્વદાત્મનિ દેહત્વં પશ્યત્યજ્ઞાનયોગતઃ ॥ ૭૫॥

પોતેન ગચ્છતઃ પુંસઃ સર્વં ભાતીવ ચઞ્ચલમ્ ।
તદ્વદાત્મનિ દેહત્વં પશ્યત્યજ્ઞાનયોગતઃ ॥ ૭૬॥

પીતત્વં હિ યથા શુભ્રે દોષાદ્ભવતિ કસ્યચિત્ ।
તદ્વદાત્મનિ દેહત્વં પશ્યત્યજ્ઞાનયોગતઃ ॥ ૭૭॥

ચક્ષુર્ભ્યાં ભ્રમશીલાભ્યાં સર્વં ભાતિ ભ્રમાત્મકમ્ ।
તદ્વદાત્મનિ દેહત્વં પશ્યત્યજ્ઞાનયોગતઃ ॥ ૭૮॥

અલાતં ભ્રમણેનૈવ વર્તુલં ભાતિ સૂર્યવત્ ।
તદ્વદાત્મનિ દેહત્વં પશ્યત્યજ્ઞાનયોગતઃ ॥ ૭૯॥

મહત્ત્વે સર્વવસ્તૂનામણુત્વં હ્યતિદૂરતઃ ।

તદ્વદાત્મનિ દેહત્વં પશ્યત્યજ્ઞાનયોગતઃ ॥ ૮૦॥

સૂક્ષ્મત્વે સર્વવસ્તૂનાં સ્થૂલત્વં ચોપનેત્રતઃ ।
તદ્વદાત્મનિ દેહત્વં પશ્યત્યજ્ઞાનયોગતઃ ॥ ૮૧॥

કાચભૂમૌ જલત્વં વા જલભૂમૌ હિ કાચતા ।
તદ્વદાત્મનિ દેહત્વં પશ્યત્યજ્ઞાનયોગતઃ ॥ ૮૨॥

યદ્વદગ્નૌ મણિત્વં હિ મણૌ વા વહ્નિતા પુમાન્ ।
તદ્વદાત્મનિ દેહત્વં પશ્યત્યજ્ઞાનયોગતઃ ॥ ૮૩॥

અભ્રેષુ સત્સુ ધાવત્સુ ધાવન્નિવ યથા શશી ।
તદ્વદાત્મનિ દેહત્વં પશ્યત્યજ્ઞાનયોગતઃ ॥ ૮૪॥

યથૈવ દિગ્વિપર્યાસો મોહાદ્ભવતિ કસ્યચિત્ ।
તદ્વદાત્મનિ દેહત્વં પશ્યત્યજ્ઞાનયોગતઃ ॥ ૮૫॥

યથા શશી જલે ભાતિ ચઞ્ચલત્વેન કસ્યચિત્ ।
તદ્વદાત્મનિ દેહત્વં પશ્યત્યજ્ઞાનયોગતઃ ॥ ૮૬॥

એવમાત્મન્યવિદ્યાતો દેહાધ્યાસો હિ જાયતે ।
સ એવાત્મપરિજ્ઞાનાલ્લીયતે ચ પરાત્મનિ ॥ ૮૭॥

સર્વમાત્મતયા જ્ઞાતં જગત્સ્થાવરજઙ્ગમમ્ ।
અભાવાત્સર્વભાવાનાં દેહતા ચાત્મનઃ કુતઃ ॥ ૮૮॥

આત્માનં સતતં જાનન્કાલં નય મહામતે ।
પ્રારબ્ધમખિલં ભુઞ્જન્નોદ્વેગં કર્તુમર્હસિ ॥ ૮૯॥

ઉત્પન્નેઽપ્યાત્મવિજ્ઞાને પ્રારબ્ધં નૈવ મુઞ્ચતિ ।
ઇતિ યચ્છ્રૂયતે શાસ્ત્રે તન્નિરાક્રિયતેઽધુના ॥ ૯૦॥

તત્ત્વજ્ઞાનોદયાદૂર્ધ્વં પ્રારબ્ધં નૈવ વિદ્યતે ।
દેહાદીનામસત્યત્વાત્ યથા સ્વપ્નઃ પ્રબોધતઃ ॥ ૯૧॥

કર્મ જન્માન્તરીયં યત્પ્રારબ્ધમિતિ કીર્તિતમ્ ।
તત્તુ જન્માન્તરાભાવાત્પુંસો નૈવાસ્તિ કર્હિચિત્ ॥ ૯૨॥

સ્વપ્નદેહો યથાધ્યસ્તસ્તથૈવાયં હિ દેહકઃ ।
અધ્યસ્તસ્ય કુતો જન્મ જન્માભાવે સ્થિતિઃ કુતઃ ॥ ૯૩॥

ઉપાદાનં પ્રપઞ્ચસ્ય મૃદ્ભાણ્ડસ્યેવ કથ્યતે ।
અજ્ઞાનં ચૈવ વેદાન્તૈસ્તસ્મિન્નષ્ટે ક્વ વિશ્વતા ॥ ૯૪॥

યથા રજ્જું પરિત્યજ્ય સર્પં ગૃહ્ણાતિ વૈ ભ્રમાત્ ।
તદ્વત્સત્યમવિજ્ઞાય જગત્પશ્યતિ મૂઢધીઃ ॥ ૯૫॥

રજ્જુરૂપે પરિજ્ઞાતે સર્પભ્રાન્તિર્ન તિષ્ઠતિ ।
અધિષ્ઠાને તથા જ્ઞાતે પ્રપઞ્ચઃ શૂન્યતાં વ્રજેત્ ॥ ૯૬॥

દેહસ્યાપિ પ્રપઞ્ચત્વાત્પ્રારબ્ધાવસ્થિતિઃ કુતઃ ।
અજ્ઞાનિજનબોધાર્થં પ્રારબ્ધં વક્તિ વૈ શ્રુતિઃ ॥ ૯૭॥

ક્ષીયન્તે ચાસ્ય કર્માણિ તસ્મિન્દૃષ્ટે પરાવરે ।
બહુત્વં તન્નિષેધાર્થં શ્રુત્યા ગીતં ચ યત્સ્ફુટમ્ ॥ ૯૮॥

ઉચ્યતેઽજ્ઞૈર્બલાચ્ચૈતત્તદાનર્થદ્વયાગમઃ ।
વેદાન્તમતહાનં ચ યતો જ્ઞાનમિતિ શ્રુતિઃ ॥ ૯૯॥

ત્રિપઞ્ચાઙ્ગાન્યતો વક્ષ્યે પૂર્વોક્તસ્યૈવ સિદ્ધયે ।
તૈશ્ચ સર્વૈઃ સદા કાર્યં નિદિધ્યાસનમેવ તુ ॥ ૧૦૦॥

નિત્યાભ્યાસાદૃતે પ્રાપ્તિર્ન ભવેત્સચ્ચિદાત્મનઃ ।
તસ્માદ્બ્રહ્મ નિદિધ્યાસેજ્જિજ્ઞાસુઃ શ્રેયસે ચિરમ્ ॥ ૧૦૧॥

યમો હિ નિયમસ્ત્યાગો મૌનં દેશશ્ચ કાલતઃ ।
આસનં મૂલબન્ધશ્ચ દેહસામ્યં ચ દૃક્સ્થિતિઃ ॥ ૧૦૨॥

પ્રાણસંયમનં ચૈવ પ્રત્યાહારશ્ચ ધારણા ।
આત્મધ્યાનં સમાધિશ્ચ પ્રોક્તાન્યઙ્ગાનિ વૈ ક્રમાત્ ॥ ૧૦૩॥

સર્વં બ્રહ્મેતિ વિજ્ઞાનાદિન્દ્રિયગ્રામસંયમઃ ।
યમોઽયમિતિ સમ્પ્રોક્તોઽભ્યસનીયો મુહુર્મુહુઃ ॥ ૧૦૪॥

સજાતીયપ્રવાહશ્ચ વિજાતીયતિરસ્કૃતિઃ ।
નિયમો હિ પરાનન્દો નિયમાત્ક્રિયતે બુધૈઃ ॥ ૧૦૫॥

ત્યાગઃ પ્રપઞ્ચરૂપસ્ય ચિદાત્મત્વાવલોકનાત્ ।
ત્યાગો હિ મહતાં પૂજ્યઃ સદ્યો મોક્ષમયો યતઃ ॥ ૧૦૬॥

યતો વાચો નિવર્તન્તે અપ્રાપ્ય મનસા સહ ।
યન્મૌનં યોગિભિર્ગમ્યં તદ્ભજેત્સર્વદા બુધઃ ॥ ૧૦૭॥

વાચો યસ્માન્નિવર્તન્તે તદ્વક્તું કેન શક્યતે ।
પ્રપઞ્ચો યદિ વક્તવ્યઃ સોઽપિ શબ્દવિવર્જિતઃ ॥ ૧૦૮॥

ઇતિ વા તદ્ભવેન્મૌનં સતાં સહજસંજ્ઞિતમ્ ।
ગિરાં મૌનં તુ બાલાનાં પ્રયુક્તં બ્રહ્મવાદિભિઃ ॥ ૧૦૯॥

આદાવન્તે ચ મધ્યે ચ જનો યસ્મિન્ન વિદ્યતે ।
યેનેદં સતતં વ્યાપ્તં સ દેશો વિજનઃ સ્મૃતઃ ॥ ૧૧૦॥

કલનાત્ સર્વભૂતાનાં બ્રહ્માદીનાં નિમેષતઃ ।
કાલશબ્દેન નિર્દિષ્ટો હ્યખણ્ડાનન્દકોઽદ્વયઃ ॥ ૧૧૧॥

સુખેનૈવ ભવેદ્યસ્મિન્નજસ્રં બ્રહ્મચિન્તનમ્ ।
આસનં તદ્વિજાનીયાન્નેતરત્સુખનાશનમ્ ॥ ૧૧૨॥

સિદ્ધં યત્સર્વભૂતાદિ વિશ્વાધિષ્ઠાનમવ્યયમ્ ।
યસ્મિન્સિદ્ધાઃ સમાવિષ્ટાસ્તદ્વૈ સિદ્ધાસનં વિદુઃ ॥ ૧૧૩॥

યન્મૂલં સર્વભૂતાનાં યન્મૂલં ચિત્તબન્ધનમ્ ।
મૂલબન્ધઃ સદા સેવ્યો યોગ્યોઽસૌ રાજયોગિનામ્ ॥ ૧૧૪॥

અઙ્ગાનાં સમતાં વિદ્યાત્સમે બ્રહ્મણિ લીનતામ્ ।
નો ચેન્નૈવ સમાનત્વમૃજુત્વં શુષ્કવૃક્ષવત્ ॥ ૧૧૫॥

દૃષ્ટિં જ્ઞાનમયીં કૃત્વા પશ્યેદ્બ્રહ્મમયં જગત્ ।
સા દૃષ્ટિઃ પરમોદારા ન નાસાગ્રાવલોકિની ॥ ૧૧૬॥

દ્રષ્ટૃદર્શનદૃશ્યાનાં વિરામો યત્ર વા ભવેત્ ।
દૃષ્ટિસ્તત્રૈવ કર્તવ્યા ન નાસાગ્રાવલોકિની ॥ ૧૧૭॥

ચિત્તાદિસર્વભાવેષુ બ્રહ્મત્વેનૈવ ભાવનાત્ ।
નિરોધઃ સર્વવૃત્તીનાં પ્રાણાયામઃ સ ઉચ્યતે ॥ ૧૧૮॥

નિષેધનં પ્રપઞ્ચસ્ય રેચકાખ્યઃ સમીરણઃ ।
બ્રહ્મૈવાસ્મીતિ યા વૃત્તિઃ પૂરકો વાયુરીરિતઃ ॥ ૧૧૯॥

તતસ્તદ્વૃત્તિનૈશ્ચલ્યં કુંભકઃ પ્રાણસંયમઃ ।
અયં ચાપિ પ્રબુદ્ધાનામજ્ઞાનાં ઘ્રાણપીડનમ્ ॥ ૧૨૦॥

વિષયેષ્વાત્મતાં દૃષ્ટ્વા મનસશ્ચિતિ મજ્જનમ્ ।

પ્રત્યાહારઃ સ વિજ્ઞેયોઽભ્યસનીયો મુમુક્ષુભિઃ ॥ ૧૨૧॥

યત્ર યત્ર મનો યાતિ બ્રહ્મણસ્તત્ર દર્શનાત્ ।
મનસો ધારણં ચૈવ ધારણા સા પરા મતા ॥ ૧૨૨॥

બ્રહ્મૈવાસ્મીતિ સદ્વૃત્ત્યા નિરાલમ્બતયા સ્થિતિઃ ।
ધ્યાનશબ્દેન વિખ્યાતા પરમાનન્દદાયિની ॥ ૧૨૩॥

નિર્વિકારતયા વૃત્ત્યા બ્રહ્માકારતયા પુનઃ ।
વૃત્તિવિસ્મરણં સમ્યક્સમાધિર્જ્ઞાનસંજ્ઞકઃ ॥ ૧૨૪॥

એવગ્ચાકૃત્રિમાનન્દં તાવત્સાધુ સમભ્યસેત્ ।
વશ્યો યાવત્ક્ષણાત્પુંસઃ પ્રયુક્તઃ સન્ ભવેત્સ્વયમ્ ॥ ૧૨૫॥

તતઃ સાધનનિર્મુક્તઃ સિદ્ધો ભવતિ યોગિરાટ્ ।
તત્સ્વરૂપં ન ચૈકસ્ય વિષયો મનસો ગિરામ્ ॥ ૧૨૬॥

સમાધૌ ક્રિયમાણે તુ વિઘ્નાન્યાયાન્તિ વૈ બલાત્ ।
અનુસન્ધાનરાહિત્યમાલસ્યં ભોગલાલસમ્ ॥ ૧૨૭॥

લયસ્તમશ્ચ વિક્ષેપો રસાસ્વાદશ્ચ શૂન્યતા ।
એવં યદ્વિઘ્નબાહુલ્યં ત્યાજ્યં બ્રહ્મવિદા શનૈઃ ॥ ૧૨૮॥

ભાવવૃત્ત્યા હિ ભાવત્વં શૂન્યવૃત્ત્યા હિ શૂન્યતા ।
બ્રહ્મવૃત્ત્યા હિ પૂર્ણત્વં તથા પૂર્ણત્વમભ્યસેત્ ॥ ૧૨૯॥

યે હિ વૃત્તિં જહત્યેનાં બ્રહ્માખ્યાં પાવનીં પરામ્ ।
વૃથૈવ તે તુ જીવન્તિ પશુભિશ્ચ સમા નરાઃ ॥ ૧૩૦॥

યે હિ વૃત્તિં વિજાનન્તિ જ્ઞાત્વાપિ વર્ધયન્તિ યે ।
તે વૈ સત્પુરુષા ધન્યા વન્દ્યાસ્તે ભુવનત્રયે ॥ ૧૩૧॥

યેષાં વૃત્તિઃ સમાવૃદ્ધા પરિપક્વા ચ સા પુનઃ ।
તે વૈ સદ્બ્રહ્મતાં પ્રાપ્તા નેતરે શબ્દવાદિનઃ ॥ ૧૩૨॥

કુશલા બ્રહ્મવાર્તાયાં વૃત્તિહીનાઃ સુરાગિણઃ ।
તેઽપ્યજ્ઞાનતયા નૂનં પુનરાયાન્તિ યાન્તિ ચ ॥ ૧૩૩॥

નિમેષાર્ધં ન તિષ્ઠન્તિ વૃત્તિં બ્રહ્મમયીં વિના ।
યથા તિષ્ઠન્તિ બ્રહ્માદ્યાઃ સનકાદ્યાઃ શુકાદયઃ ॥ ૧૩૪॥

કાર્યે કારણતાऽऽયાતા કારણે ન હિ કાર્યતા ।
કારણત્વં સ્વતો ગચ્છેત્કાર્યાભાવે વિચારતઃ ॥ ૧૩૫॥

અથ શુદ્ધં ભવેદ્વસ્તુ યદ્વૈ વાચામગોચરમ્ ।
દ્રષ્ટવ્યં મૃદ્ઘટેનૈવ દૃષ્ટાન્તેન પુનઃ પુનઃ ॥ ૧૩૬॥

અનેનૈવ પ્રકારેણ વૃત્તિર્બ્રહ્માત્મિકા ભવેત્ ।
ઉદેતિ શુદ્ધચિત્તાનાં વૃત્તિજ્ઞાનં તતઃ પરમ્ ॥ ૧૩૭॥

કારણં વ્યતિરેકેણ પુમાનાદૌ વિલોકયેત્ ।
અન્વયેન પુનસ્તદ્ધિ કાર્યે નિત્યં પ્રપશ્યતિ ॥ ૧૩૮॥

કાર્યે હિ કારણં પશ્યેત્પશ્ચાત્કાર્યં વિસર્જયેત્ ।
કારણત્વં સ્વતો નશ્યેદવશિષ્ટં ભવેન્મુનિઃ ॥ ૧૩૯॥

ભાવિતં તીવ્રવેગેન યદ્વસ્તુ નિશ્ચયાત્મના ।
પુમાંસ્તદ્ધિ ભવેચ્છીઘ્રં જ્ઞેયં ભ્રમરકીટવત્ ॥ ૧૪૦॥

અદૃશ્યં ભાવરૂપઞ્ચ સર્વમેતત્ ચિદાત્મકમ્ ।
સાવધાનતયા નિત્યં સ્વાત્માનં ભાવયેદ્બુધઃ ॥ ૧૪૧॥

દૃશ્યં હ્યદૃશ્યતાં નીત્વા બ્રહ્માકારેણ ચિન્તયેત્ ।
વિદ્વાન્નિત્યસુખે તિષ્ઠેદ્ધિયા ચિદ્રસપૂર્ણયા ॥ ૧૪૨॥

એભિરઙ્ગૈઃ સમાયુક્તો રાજયોગ ઉદાહૃતઃ ।
કિઞ્ચિત્પક્વકષાયાણાં હઠયોગેન સંયુતઃ ॥ ૧૪૩॥

પરિપક્વં મનો યેષાં કેવલોऽયં ચ સિદ્ધિદઃ ।
ગુરુદૈવતભક્તાનાં સર્વેષાં સુલભો જવાત્ ॥ ૧૪૪॥

॥ ઇતિ શ્રીમદ્શઙ્કરાચાર્યવિરચિતા અપરોક્ષાનુભૂતિઃ સમાપ્તા ॥

Encoded and proofread by Sunder Hattangadi
Proofread by David Lyttle, PSA Easwaran and kalyana krrit

*AparokShanubhuti by Shankaracharya*
pdf was typeset on January 12, 2022

Please send corrections to *sanskrit@cheerful.com*